# Savitri Ashtottarashatanama Stotram

# सावित्र्यष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Savitri Ashtottarashatanama Stotram

File name : sAvitrIaShTottarashatanAmastotram.itx

Category : devii, devI, bRRihannAradIyapurANa, aShTottarashatanAma, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 83/155-168||

Latest update : November 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 16, 2024

*sanskritdocuments.org*

# सावित्र्यष्टोत्तरशतनामस्तोत्रम्

(नारदाय सनत्कुमारप्रोक्तम्)

सनत्कुमार उवाच ।

भूतिदा भुवना वाणी महावसुमती मही ॥ ८३-१५५॥

हिरण्यजननी नन्दा सविसर्गा तपस्विनी ।
यशस्विनी सती सत्या वेदविच्चिन्मयी शुभा ॥ ८३-१५६॥

विश्वा तुर्या वरेण्या च निसृणी यमुना भुवा ।
मोदा देवी वरिष्ठा च धीश्च शान्तिर्मती मही ॥ ८३-१५७॥

धिषणा योगिनी युक्ता नदी प्रज्ञाप्रचोदनी ।
दया च यामिनी पद्मा रोहिणी रमणी जया ॥ ८३-१५८॥

सेनामुखी साममयी बगला दोषवार्जिता ।
माया प्रज्ञा परा दोग्ध्री मानिनी पोषिणी क्रिया ॥ ८३-१५९॥

ज्योत्स्ना तीर्थमयी रम्या सौम्यामृतमया तथा ।
ब्राह्मी हैमी भुजङ्गी च वशिनी सुन्दरी वनी ॥ ८३-१६०॥

ॐ कारहंसिनी सर्वा सुधा सा षड्गुणावती ।
माया स्वधा रमा तन्वी रिपुघ्नी रक्षणी सती ॥ ८३-१६१॥

हैमी तारा विधुगतिर्विषघ्नी च वरानना ।
अमरा तीर्थदा दीक्षा दुर्धर्षा रोगहारिणी ॥ ८३-१६२॥

नानापापनृशंसघ्नी षद्वदी वज्रिणी रणी ।
योगिनी विमला सत्या अबला बलदा जया ॥ ८३-१६३॥

गोमती जाह्नवी रज्वी तपनी जातवेदसा ।
अचिरा वृष्टिदा ज्ञेया ऋततन्त्रा ऋतात्मिका ॥ ८३-१६४॥

सर्वकामदुघा सौम्या भवाहङ्कारवर्जिता ।

द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा ॥ ८३-१६५॥

अष्टापदी नवपदी सहस्राक्षाक्षरात्मिका ।
अष्टोत्तरशतं नाम्नां सावित्र्या यः पठेन्नरः ॥ ८३-१६६॥

स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ।
एतत्ते कथितं विप्र पञ्चप्रकृतिलक्षणम् ॥ ८३-१६७॥

मन्त्राराधनपूर्वं च विश्वकामप्रपूरणम् ॥ ८३-१६८॥

इति नारदपुराणे पूर्वभागे त्र्यशीतितमाध्यायान्तर्गतं
नारदाय सनत्कुमारप्रोक्तं सावित्र्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय ८३/१५५-१६८॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 83/155-168..

Proofread by PSA Easwaran

*Savitri Ashtottarashatanama Stotram*

pdf was typeset on November 16, 2024

Please send corrections to *sanskrit@cheerful.com*